# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-३ (SEM-5)** | **प्रश्नपत्र-७** | **गुणा: - ७०** |
| **विषयः- पौरोहित्यम्** | **CE359** | **समयः - ११ तः ०२** |
| **दिनाङ्कः - ०१/१२/२०१६** | **सन्दर्भग्रन्थः - याज्ञिकन्यायमाला** | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ अधोलिखितेषु द्वयोरेव श्लोकयोः व्याख्या कार्या । ०८**

१. यो वैदिकः शब्दराशिः श्रौतस्मार्तादिकर्मसु ।
प्रयुज्यते स मन्त्रः स्याद् वेदो नेत्यत्र संशये ॥

२. तानः स्वरो नैव तर्हि तद्युक्ते यज्ञकर्मणि ।
मन्त्रः स्वरविहीनो हि वाग्वज्रो हन्ति याजकम् ॥

३. नवग्रहादिमन्त्राणां युक्तार्थान्तरकल्पना ।
एतद् यज्ञस्येति श्रुत्या क्रियमाणस्य कर्मणः ॥

**प्र-२ होमादौ शाखाधर्मनिराकरणाधिकरणं यथाशास्त्रं विवेचयत । ०८**

**अथवा**

**आख्यानानां प्ररोचनाधिकरणं प्रतिपादयत ।**

**प्र-३ अधस्तनेषु द्वयोः टिप्पणीं लिखत । ०४**

१. वेदलक्षणानि ।

२. वेदाध्ययनविधिः ।

३. मन्त्रलक्षणम् ।

**प्र-४ अधस्तनेषु पञ्च प्रश्नाः एकवाक्येन समाधेयाः । ०५**

१. याज्ञिकन्यायमालायाः कर्ता कः ?

२. ब्रह्मचारिणा कुतः यावदध्येतव्या ?

३. वेदं समाप्य किं कर्तव्यम् ?

४. "द्विजः" इति शब्दस्य अर्थं लिखत ।

५. श्रौतकर्मसु स्त्रीणाम् अधिकारः वा न ?

६. कः वियोनिमधिगच्छति ?

७. हस्तस्वरं कदा न कुर्वीत ?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ अधोलिखितेषु द्वयोरेव श्लोकयोः व्याख्या कार्या । ०८**

१. ज्ञापकं परशाखीय पदार्थग्रहणे स्फुटम् ।
तस्मात् स्वशाखान्यशाखाविध्योरपि समुच्चयः ॥

२. कुशण्डिका कौशिकेऽस्ति समन्त्रान्यत्रनैविकम् ।
समुच्चयो न वेत्यत्र मन्त्रो नैव विरुध्यते ॥

३. देशाचारः कुलाचारः समुच्चयो न वा भवेत् ।

आचारः शास्त्रतोऽतुल्यस्तस्मान्नैव समुच्चयः ॥

**प्र-६ इतिहासस्य धर्मप्रामाण्यभावविषये यथाशास्त्रं लिखत । ०८**

**अथवा**

**श्रौतस्मार्तकर्मणोः वैशिष्ट्यं प्रतिपादय ।**

**प्र-७ एकस्य टिप्पणी कार्या । ०२**

१. आचारग्रहणम् ।

२. स्वशाखीयधर्मसमन्वयः ।

**प्र-८ अधस्तनेषु द्वयोः प्रश्नयोः उत्तरं लिखत । ०२**

१. अष्टकपालादिद्रव्यं कति विधम् ?

२. शाखाभेदात् वेदभेदो भवति न वा ?

३. प्रणितास्थापनं कस्यां दिशि भवति ?

४. मीमांसाशास्त्रानुंसारं वेदः पौरुषेयः अपौरुषेयः वा ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः श्लोकयोः व्याख्या कार्या । ०८**

१. कोटिलक्षजपादौ हि सङ्ख्या नैव नियम्यते ।
कालमाश्रित्य सङ्ख्यास्यादृत्विजां पूर्तिहेतवे ॥

२. वित्तशाठ्यं वर्जयित्वा कर्तव्यमिति निर्णयात् ।
यावता ब्रह्मणां तोषः शक्तिः स्वस्य तथा क्रिया ॥

३. कौटुम्बिकसदस्यानामुपकारित्वहेतुना ।
स्त्री गव्येव प्रदेया स्यात् सामान्येऽपीतिनिर्णयः ॥

**प्र-१० तृतीयाध्यायस्य सारांशः लेख्यः । ०८**

**अथवा**

**पाकयज्ञपेटिकाप्रकरणस्य विषयवस्तु प्रस्तूयताम् ।**

**प्र-११ अधस्तनेषु द्वयोः टिप्पणीं लिखत । ०४**

१. ऋत्विक्संख्या ।

२. व्रतावधिनिर्णयः ।

३. पाकयज्ञप्रयोगः ।

४. दक्षिणापरिमाणः ।

**प्र-१२ निम्नाङ्कितेषु पञ्च प्रश्नाः एकवाक्येन समाधेयाः । ०५**

१. कति पाकयज्ञाः ?

२. नवग्रहमखे ऋत्विजः कति ?

३. शतचण्डीपाठेषु कति ऋत्विजः भवन्ति ?

४. ग्रन्थकारस्य किं नाम ?

५. सुवर्णेन सह दक्षिणा कस्मै दीयते ?

६. वित्तशाठ्यं कुत्र न कर्तव्यम् ?